# संस्कृतवार्ता:

02.02.2025

प्रातः - 06:55

## प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना उदीरितं यत् आय-व्यय-पत्रकं पञ्चविंशत्युत्तर द्विसहस्रतः षड्विंशति-सत्रं देशस्य चत्वारिंशद-धिकैक-शतकोटि-भारतीयानां आकांक्षाणां प्रपूर्तेः आश्वासनं प्रदर्शयति। आय-व्यय-पत्रकात् परं संदेश-पुटके तेन प्रोक्तं यत् एषा भारतस्य प्रगतौ महत्त्वपूर्णा विकास यात्रा भविष्यति। मोदी उक्तवान् यत् एतत् आय-व्यय-पत्रकं प्रत्येकं भारतीयस्य स्वप्नान् प्रपूरयिष्यति। श्रीमोदी एतदपि उक्तवान् यत् आय-व्यय पत्रकेण देशस्य मध्यवर्तिनः जनाः लाभान्विताः भविष्यन्ति। द्वादशलक्षरूप्यकाणि यावत् आयवन्तः जनाः करात् बहिः सन्ति। अनेन कृषि-क्षेत्रं ग्रामीणार्थव्यवस्था इत्यादयः च सशक्ताः भविष्यन्ति।

## वित्तमन्त्री

वित्तमन्त्री निर्मला सीतारामन् ह्यः एन०डी०ए० इत्येतस्य प्रशासनस्य प्रथमं पूर्ण-वित्तसङ्कल्पनापत्रम् उपस्थापितवती। लोकसभायां वित्तमन्त्रिणा उद्घोषितं यत् अधुना द्वादश-लक्षरूप्यकाणि आयपर्यन्तं करस्तरः शून्यं भविष्यति। एषा नूतन-करग्रहण-व्यवस्थायां नूतन-आयकर-स्तरान् अपि प्रावर्तयत्।

असौ उक्तवती यत् अनया नूतन-संरचनया मध्यमवर्गस्य कृते करः न्यूनः भविष्यति, तेषां पार्श्वे अधिकं धनम् अवशिष्टं भविष्यति। वरिष्ठनागरिकेभ्यः ऋणवृद्धौ कर-व्यवकलनस्य सीमा पञ्चाशत्-सहस्रात् द्विगुणितं कृत्वा एकलक्षं यावत् कृता। वित्तमन्त्रिणा राज्यैः सह सहभागितायां कृषिक्षेत्राय एकः कार्यक्रमः "प्रधानमन्त्री धन-धान्य-कृषि-योजना" इत्येषः उद्घोषितः। असौ उक्तवती यत् वर्तमान-योजनानाम् अभिसरणेन सह अयं कार्यक्रमः शत-जनपदानां न्यूनोत्पादकता सस्य-विविधीकरणं च व्याप्तं करिष्यति। वित्तमन्त्रिणा निर्मला सीतारामन् इत्यनया उद्घोषितं यत् पञ्चलक्ष-महिलानाम्, अनुसूचित-जातीनाम् अनुसूचित-जनजातीनाञ्च प्रथम-उद्यमशीलेभ्यः एका

नूतन-योजना आरप्स्यते। अनया योजनया आगामि-पञ्च-वर्षावधौ द्विकोटि-रूप्यकाणि यावत् सावधि-ऋणं प्रदास्यते।

## छत्तीसगढ़-माओवादी :

छत्तीसगढे ह्यः बीजापुरमण्डले सुरक्षाबलेन सह जाते संघर्षे अष्ट माओवादिनः मारिताः। आरक्षी बलानुसारी गङ्गलूरु क्षेत्रे मण्डल-रिजर्व-गार्ड, (सीआरपीएफ) इति केन्द्रीय-रिजर्व-पुलिस-फोर्स इत्येतस्य विशिष्ट कमाण्डो-बटालियन-फ़ॉर-रिजोल्यूट-एक्शन (कोब्रा) तथा विशिष्टकार्यबलेत्यादीनां सुरक्षाबलानाम् संयुक्तदलेन प्राप्तसूचनानन्तरं माओवादीनः विरुद्धाभियानं प्रारब्धम् ।

## क्रिकेट्

पुरुषक्रिकेट्-क्रीडायां अद्य सायं मुम्बईनगरस्य वानखेडे-क्रीडाङ्गणे पञ्चमे अन्तिमे च विंशतिः प्रति विंशतिः अन्तर्राष्ट्रीय-क्रीडायां भारतं इङ्ग्लैण्ड-दलं सम्मुखी विरुद्धं करिष्यति। भारतीयमानकसमयानुसारी क्रीडायाः प्रसारणं सायं सप्त वादने भविष्यति।

## संस्कृत-साप्ताहिकी

संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्०एम्०गोल्ड्०-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ताः।।